भवेत् । कर्महेतुकस्य मोक्षःप्राप्नोति न ज्ञाननिमित्त इति । स चानिष्टःअनित्यत्वञ्च मोक्षस्य प्राप्नोति । न हि क्रियानिर्वृत्तोऽर्थो नित्यो दृष्टः । नित्यश्च मोक्षोऽभ्युपगम्यते । "एष नित्यो महिमेति" मन्त्रवर्णात्" इ॰उ॰भा॰ । २परमात्मनि तस्य सर्व्वेषामात्मत्वेनान्यकामयितव्याभावात् आप्तकामत्वम्" आप्तः युक्तः उचितः कामः इच्छा यस्य इति विग्रहे तु । नैयायिकमतसिद्धे ३ईश्वरे च सद्विषयकेच्छाश्रयत्वादीश्वरस्य तथात्वम् ।

**आप्तकारिन्** त्रि॰ आप्तं युक्तं करोति कृ–णिनि ६त॰ । १युक्तकारके आप्तश्चासौ कारी । २प्रत्ययिते आज्ञाकारके भृत्यादौ । "अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः" मनुः । "भीष्माद्दीनाञ्च सर्वेषां सुहृदामाप्त कारिणाम्" "अन्विष्य दाहयामास पुरुषैराप्तकारिभिः" भा॰ । भा॰ आश्र॰ प॰ ११अ॰ ।

**आप्तगर्भा** स्त्री आप्तोगर्भो यया । गर्भिण्याम् स्त्रियाम् ।

**आप्तवाच्** स्त्री आप्ता युक्ता प्रमादादिदोषशून्या वाक् । १वेदे तन्मूले २स्मृतीहासपुराणादौ च "आप्तवागनुमानानाभ्यां साध्यं त्वां प्रति का कथा"रघुः आप्तवचनाप्तवाक्यादयोऽप्यत्र न॰। आप्ता युक्ता वाग् यस्य। प्रमादशून्यवाक्ये महर्षिप्रभृतौ त्रि॰ । आप्तवचनाप्तवाक्यादयोऽप्यत्र त्रि॰

**आप्तश्रुति** स्त्री कर्म्म॰। १वेदे २स्मृत्यादौ च आप्तशब्दे उदा॰।

**आप्ति** स्त्री आप–क्तिन् । १संयोगे, २संप्राप्तौ ३स्त्रीसंयोगे" मेदि॰ ४संबन्धे, ५लाभे हेम॰ ६समाप्तौ "कामस्याप्तिं जगतः प्रतिष्ठाम्" कठोप॰ । कामस्याप्तिं समाप्तिम् तत्र हि सर्व्वे परिकामाःसमाप्ताः" भा॰ ७सम्पदि च"सैवास्याप्तिर्या सम्पत्"शत॰ब्रा॰। तत्र संबन्धे "स्त्रयोराप्तिमतिमुच्यते"शत॰ब्रा॰। लाभे"सर्वावाप्तैर सर्वस्यावरुद्धै" शत॰ ब्रा॰ "तपः क्विेदं तदवाप्तिसाधनम्"कुमा॰"दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये ततः" भा॰आश्व॰१८अ॰। ८उत्सरकाले आयतौ च त्रिकाण्ड॰।

**आप्त्र** त्रि॰आप–तव्य वेदे नि॰ । १आप्तव्ये "पनित आप्त्रा यजतः"ऋ॰५,४१,६। "आप्त्रः आप्तव्यः"भा॰ लोके तु आप्तव्य इत्येव । आप्तिमर्हति यत् । २आप्तियोग्ये त्रि॰।

**आप्नवान** पु॰ अप्नवानएव स्वार्थे अण्। अप्नवानशब्दार्थे वत्सगोत्र प्रवरे ऋषिभेदे ।

**आप्य** त्रि॰ अपामिदम् अण् चातु॰ स्वार्थे ष्यञ् । १जलसम्बन्धिनि अपां विकारे तु अम्मयमित्येव" सि॰कौ॰ आप–यत् । २प्राप्ये त्रि॰"योनोनेदिष्ठमाप्यम्" ऋ॰७,१५,२, ३चाक्षुषमन्वन्तरीये देवभेदे च । "चाक्षुषस्यान्तरे तात ! मनोर्देवानिमान् शृणु । आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः । लेखानाम महाराज पञ्च देवाः प्रकीर्त्तिता" हरिवं १७अ॰। "मानुषा आशापाला अथैते देवाश्चाप्याः साध्याः अन्वाध्या मरुतः" इति शत॰ब्रा॰ कर्म्मभिराप्यत्वात्तेषामाप्यत्वम् द्रष्टव्यम् । ४(कुड)वृक्षे पु॰रायमुकुटः ।

**आप्यान** न॰आ+प्याय–भावे क्त । १प्रीतौ २वृद्धौ च । कर्त्तरि क्त । ३प्रीते ४वृद्धे च त्रि॰।

**आप्यायन** न॰आ+प्याय-ल्युट् । १वृद्धौ, २प्रीतौ च । णिच् ल्युट् । ३तर्पणे प्रीणने ४वर्द्धने च "अग्नेः सोमयमाभ्यां च कृत्वाप्यायनमादितः"मनुः । ल्यु । ५प्रीणनकर्त्तरि त्रि॰। "पितृप्रसादमिच्छेयं तप आप्यायनं पुनः" भा॰व॰प॰ ८३अ॰। "दैवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतम्" मनुः तन्त्रोक्ते ६दीक्षणीयमन्त्रसंस्कारभेदे "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धदायिनः । जननं जीवनं पश्चात्ताड़नं बोधनं तथा । अथाभिषेको विमलीकरणाप्यायने तथा । तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंक्रियाः" इति विभज्य ।"कुशोदकेन मन्त्रेण प्रत्यर्णं प्रोक्षणं मनोः । तेन मन्त्रेण विधिवदेतदाप्यायनं मतम्" शा॰ति॰ उक्तम् ।

**आप्यायित** त्रि॰आ+प्याय–णिच्–क्त । १प्रीणिते२पूरिते३वर्द्धिते च । "एषा सूर्य्यस्य वीर्य्येण सोमस्याप्यायिता तनुः । पौर्णमास्यां स दृश्येत संपूर्णो दिवसक्रमात्"कू॰पु॰ । ४आनन्दिते च ।

**आप्र** त्रि॰ आ+पृ मूल॰क । १पूरके । "स्वर्जेषे भर आप्रस्य वक्मनिः" ऋ॰ १,१२२,२ "चक्षुर्मित्रस्य वरुणस्याग्नेराप्रा द्यावा" सूर्य्योपस्थानमन्त्रः ।

**आप्रच्छन** न॰ आ+प्रच्छ–ल्युट् । गमनागमनसमये १बन्धूनामन्योन्यकुशलजिज्ञासायाम् २आनन्दसम्पादने च ।

**आप्रच्छन्न** त्रि॰ आ+प्र–छद–क्त । १अत्यन्तगुप्ते २ईषद्गुप्ते च अस्याप्रच्छनार्थत्वोक्तिः शब्दकल्पद्रुमे प्रामादिकी हेमचन्द्रे आप्रच्छनमित्येव पाठः द्वित्वनकारयुक्तपाठस्तु प्रमादिकः ।

**आप्रपद** अव्य॰ प्रपदं पदाग्रं तत्पर्य्यन्तम् अव्ययी॰। पादाग्रपर्य्यन्ते

**आप्रपदीन** त्रि॰आप्रपदं पादाग्रान्तं व्याप्नोति ख । पादाग्रान्तं लम्बमाने वस्त्रादौ ।

[ईषद्द्रवणे ।

**आप्रवण** त्रि॰ ईषत् प्रवणः । ईषन्नम्रे आ+प्रु–ल्युट् ।

**आप्री** स्त्री आप्रीणात्यनया आ–प्री–ड गौरा॰ ङीष् । प्रयाजयाज्यायाम् "प्रैषेभिः प्रैषेणाप्नोत्याप्रीभिराप्रीर्यज्ञस्य" यजु॰ १६,१६ । "आप्रीभिः प्रयाजयाज्याभिः"